मेदि० । १२वालाख्यवृक्षे च स्त्री शब्दचन्द्रिकाकोषः ।

**रमणीय** त्रि० रम्यतेऽत्र रम–आधारे-अनीयर् । सुन्दरे । ततो भावे वुञ् । रामणीयक तद्भावे न० ।

**रमति** पु० रम-अतिच् । १नायके २स्वर्गे मेदि० । ३कामे शब्दर० ४काले ५कामदेवे सि०कौ० ।

**रमल** न० ज्यौतिःशास्त्रभेदे यत्र पाशकक्षेपणेन लग्ननिर्णयद्वारा प्रश्नादिफलप्रतिपादनम् ।

**रमा** स्त्री रमयति रम-अच् । १लक्ष्म्याम् मेदि० २कल्किभार्य्यायां कल्किपु० । ३शोभायां राजनि० ।

**रमापति** पु० ६त० । नारायणे रमानाथतत्कान्तादयोऽप्यत्र

**रमाप्रिय** न० ६त० । १पद्मे शब्दच० । २विष्णौ पु० ।

**रम्भ** पु० रभि-अच् मुम् । १रेणौ २असुरभेदे च मेदि० । स च महिषासुरजनकः कालिकापु० । ४कदल्याम् ५अप्सरोभेदे स्त्री मेदि० ६वेश्यायां धरणिः । ७गवां ध्वनौ हेमच० । ८गौर्य्याञ्च स्त्री शब्दर० । ९उत्तरस्यां दिशि निघण्टुः ।

**रम्भातृतीया** स्त्री रम्भा गौरी ६त० । मार्गशीर्षशुक्लतृतीयायाम् उपचारात् तत्र कर्त्तव्ये गौरीपूजाङ्गके २व्रतभेदे च ।

**रम्य** त्रि० रम्यतेऽत्र यत् । १सुन्दरे मेदि० । २वलकरे जटा० । ३चम्पके पु० मेदि० ४वकवृक्षे पु० शब्दच० । ५पटोलमूले न० मेदि० । संज्ञायां कन् । ६प्रधानधातौ शुक्रे न० जटा० । जम्बुद्वीपस्थेषु नवसु वर्षेषु मध्ये "दक्षिणेन सुमेरोस्तु श्वेतस्य चोत्तरेण च वायव्यं रम्यकं नाम" इत्युक्ते ७वर्षभेदे ।

**रम्यपुष्प** पु० रम्याणि पुष्पाण्यस्य । शाल्मलीवृक्षे राजनि० ।

**रम्या** स्त्री रम्यतेऽत्र यत् । १स्थलपद्मिन्याम् राजनि० । २रात्रौ च मेदि० । [अरयिध्वम् ।

**रय** गतौ भ्वा० आ० सक० सेट् । रयते अरयिष्ट । अरयिढ्वम्

**रय** पु० रय-अच् । १वेगे अमरः । २प्रवाहे च ।

**रयि** न० रय-इन् । १जले २धने च निघण्टुः । [५।२१

**रराट** न० ललाट+पृषो० । ललाटे "विष्णोरराटमसि" यजु०

**रल्लक** पु० रम-क्विप् मलोपे तुक् ला-क कर्म० । १मृगभेदे सङ्कुटः । २कम्बले अमरः ३नेत्रलोम्नि च भूभृतिः ।

**रव** गतौ भ्वा० आ० सक० सेट् इदित् । रवते अरविष्ट ।

**रव** पु० रु-ध्वनौ अप् । शब्दे अमरः ।

**रवण** पुंस्त्री० रु-युच् । १कोकिले सि०कौ० २उष्ट्रे च हेमच० स्त्रियां ङीष् । ३कांस्ये न० हेमच० । ४शब्दकारके ५तीक्ष्णे ६चञ्चले ७भाण्डके च त्रि० शब्दर० ।

**रवि** पु० अव-इन् रुट् च । १सूर्य्ये शब्दर० । २अर्कवृक्षे च "अचिरात् प्रकाशेन अवनात् स रविः स्मृतः" मत्स्यपु० तन्नामनिरुक्तिः । ३द्वादशसंख्यायाम् ।

**रविज** पु० रवेर्जायते जन–ड । १शनौ २सावर्णिमनौ ३वैवस्वते मनौ ४सुग्रीवे वानरे ५यमे च ६यमुनायां स्त्री रवितनयादयोऽप्यत्र । [च शब्दच० ।

**रविनाथ** न० रविर्नाथः प्रकाशकत्वात् यस्य । १पद्मे २बन्धूके

**रविनेत्र** पु० रविर्नेत्रं यस्य । विष्णौ रविलोचनादयोऽप्यत्र । "चक्षुः सूर्य्यो अजायत" पुरुषसू० उक्तेस्तस्य तथात्वम् ।

**रविप्रिय** न० ६त० । १रक्तकमले २ताम्रे च ३करवीरे पु० राजनि० ४आदित्यपत्रे ५लकुचे पु० शब्दच० ।

**रविरत्न** न० रवेः प्रियं रत्नम् शा०त० । माणिक्ये राजनि० ।

**रविलोह** न० रवेः प्रियं लौहं धातुः । ताम्रे राजनि० ।

**रश** स्वने सौ० पर० अक० सेट् । रशति अराशीत् अरशीत्

**रशना** स्त्री अश–युच् रशादेशः । १काञ्च्याम् २जिह्वायाञ्च शब्दर० । ३दामनि च "इमामगृभ्णन् रशनामृतस्य" श्रुतिः तत्रार्थे दन्त्यमध्य एवेत्यन्ये ।

**रश्मि** पु० अश-मि धातोरुट् रश-मि वा । १किरणे २अश्वादिदामनि ३पद्मे न० मेदि० ।

रवेः रश्मिभेदादिकार्य्यं मत्स्यपु० १०२ अ० उक्तं यथा "तेजोभिः सर्वलोकेभ्यो ह्यादत्ते रश्मिभिर्जलम् । समुद्राद्वायुसंयोगाद् वहन्त्यापो गभस्तयः । ततस्तु पर्य्ययकाले परिवर्त्तन् दिवाकरः । नियच्छत्यपो मेघेभ्यः शुक्लाशुक्लैस्तु रश्मिभिः" ।

कूर्मपु० ४अ० विस्तरेणोक्तं यथा "एवमेष महादेवो देवदेवः पितामहः । करोति नियतं कालं कालात्मा ह्यैश्वरी तनुः । तस्य ये रश्मयो विप्राः सर्वलोकप्रदीपकाः । तेषां श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः । सुषुम्णो हरिकेशश्च विश्वकर्मा तथैव च । विश्वव्यचाः पुनश्चान्यः सम्पद्वसुरतः परः । अर्वावसुरिति ख्यातः स्वराडन्यः प्रकीर्त्तितः । सुषुम्णः सूर्य्यरश्मिस्तु पुष्णाति शिशिरद्युतिम् । तिर्य्यगूर्द्ध्वप्रचारोऽसौ सुषुम्णः परिगीयते । हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः । विश्वकर्मा तथा रश्मिर्बुधं पुष्णाति सर्वदा । विश्वव्यचास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा । सम्पद्वसुरिति ख्यातः स पुष्णाति च लोहितम् । बृहस्पतिं प्रपुष्णाति रश्मिरर्वावसुः प्रभोः । शनैश्चरं प्रपुष्णाति सप्तमस्तु स्वराट् तथा । एवं सूर्य्यप्रभावेन सर्वा नक्षत्रतारकाः । वर्द्धन्ते वर्द्धिता